International Journal of Sanskrit Research 2018; 4(5): 60-63

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 60-63
© 2018 IJSR
www.anantaajournal.com
Received: 18-07-2018
Accepted: 20-08-2018

**धर्मेन्द्र दास:**
सहायकप्राचार्य:,
स्नातकोत्तरसंस्कृतविभाग:,
उत्कलविश्वविद्यालय:, वाणीविहार:,
भुवनेश्वररम्, उड़ीसा, भारत

**Correspondence**
**धर्मेन्द्र दास:**
सहायकप्राचार्य:,
स्नातकोत्तरसंस्कृतविभाग:,
उत्कलविश्वविद्यालय:, वाणीविहार:,
भुवनेश्वररम्, उड़ीसा, भारत

# काशिकावृत्तिगतोदाहरणेषु वैदिकधर्म: एकमनुशीलनम्

**धर्मेन्द्र दास:**

**शोधसंक्षिप्तिका**
विचित्रा हि सूत्रस्य कृति: पाणिने:। लक्षणैकचतुष्कव्याकरणपरम्परायां भगवद्पाणिनिविरचिताया: अष्टाध्याय्या: व्याखानग्रन्थत्त्वेन सर्वाधिका प्राचीना प्रामाणिका चास्ति जयादित्यवामनविरचिता काशिकावृत्ति:। अष्टाध्यायीसूत्राणां व्याखानदशायां काशिकायां प्रदत्तानां वैदिकधर्मनिष्ठानाम् उदाहरणानाम् अध्ययनपरक: प्रयत्न: शोधपत्रेऽस्मिन् अभिप्रेत:।

**कूटशब्दा:** काशिका, उदाहरणम्, धर्म:, वैदिक:

## प्रस्तावना
विद्यावाङ्मये व्याकरणविद्या एव मोक्षमाणानां कृते राजपद्धति:। परं व्याकरणविद्यावगमे तन्निष्ठसिद्धान्तज्ञानमपरिहार्यम्। तत्र खलु कस्यचिदपि शास्त्रीयसिद्धान्तस्य पूर्णता उदाहरणमतिरिच्य नैव सम्भवति। व्याकरणशास्त्रस्य सिद्धान्ता: सूत्रनिष्ठा: भवन्ति। सत्स्वपि नैकेषु व्याकरणग्रन्थेषु महर्षिपाणिनिविरचिता अष्टाध्यायी भुवनविदिता। भगवता सूत्राणां विरचनमत्र विहितम्। सूत्रात्मकस्यास्य ग्रन्थरत्नस्य वृत्तिग्रन्थत्वेन व्याख्यानग्रन्थत्वेन वा व्याकरणवाङ्मये प्रसिद्धा च काशिकावृत्ति:। सूत्रार्थप्रधाना खलु वृत्ति:। सूत्रार्थकथनावसरे सूत्रव्याख्यानावसरे वा उदाहरणोपस्थापनं व्याकरणशास्त्रस्य प्रमुख: सिद्धान्त: भवति। तदर्थमेव वार्त्तिककारेण ९लक्ष्ये लक्षणं व्याकरणमिति" प्रोक्तम्। काशिकावृत्तौ अष्टाध्यायीसूत्राणां व्याख्यानदशायां प्रस्तुतानामुदाहरणानां वैशिष्ट्यं नूनमेव गवेषणाजगति स्वातन्त्र्यमर्हति। व्याकरणस्य लक्षणपूर्त्तये यद्यपि उदाहरणानि प्रदीयन्ते, तथापि काशिकोदाहरणै: तात्कालिकसामाजस्य सविस्तरं तथ्यमुपादीयते। तत्र हि विद्यमानमैतिहासिकं तत्त्वनिष्ठं वैदिकतथ्यं गवेषणाया: मार्गं प्रस्तौति।

## प्रस्तुताध्ययनस्य परिसर: प्रासङ्गिकता च
उदाहरणदृष्ट्या काशिकाया: विशिष्टं दानं वर्त्तते पाणिनीयपरम्परायाम्। पारम्पर्यक्रमेण प्राचीनेभ्य: वृत्तिग्रन्थेभ्य: कानिचन उदाहरणानि काशिकावृत्तौ समुपलभ्यन्ते। एतानि उदाहरणानि काशिकाव्याखातु: हरदत्तस्य मतेन ९चिरन्तनप्रयोगा:" इत्युच्यन्ते। सिद्धान्तकौमुद्यादिग्रन्थेषु महनीया इयं परम्परा विशृङ्खलिता दृश्यते। एतेषु ग्रन्थेषु प्राचीनोदाहरणमतिरिच्य साम्प्रदायिकभावोपेतानाम् उदाहरणानां संग्रह: विद्यते। एतादृश्या: महनीयाया: परम्पराया: सुरक्षा साम्प्रतिके युगेऽस्मिन् अनिवार्या भवति। प्राचीनानां वैदिकधर्मनिष्ठानाम् उदाहरणानां गवेषणात्मकमध्ययनं काशिकावृत्तिं विहाय सम्भावयितुं नैव शक्यते।

## पाणिनीयव्याकरणपरम्परायां काशिकावृत्ति:
शास्त्रेष्वाद्यं व्याकरणम्। सर्वेषामपि शास्त्राणामुपकारकत्त्वेन व्याकरणमेव छन्दसां प्रथममङ्गमिति स्वीक्रियते बुधै:। तत्र महर्षिणा पाणिनिना प्रणीतं पाणिनीयं महाशास्त्रं भुवनविदितं सूत्रात्मकमिदम् अष्टाध्यायीग्रन्थरत्नं प्रामुख्येन राजते। पाणिनीयसूत्राणामुपरि रचितेषु वृत्तिग्रन्थेषु प्राचीनतम: प्रामाणिकश्च भवति काशिकावृत्त्याख्य: महार्घ: ग्रन्थ:। वैयाकरणयो: जयादित्यवामनयो: सम्मिलिता वृत्तिरियम्। प्राचीनैराचार्यैस्तु काशिकाया: उद्धरणानामाधारेण लेखनशैलीपर्यवेक्षणेन चादित: पञ्च अध्याया: जयादित्यविरचिता:, शेषाश्चान्तिमा: त्रयोऽध्याया: वामनविरचिता: सन्तीति मन्यन्ते। वर्त्तमना काशिकावृत्ति: जयादित्यवामनयो: उभयोरपि कृतिर्नात्र शङ्कावसर:। इतिहासेन ज्ञायते यत् जयादित्यस्य काल: सं.६५७ वैक्रमाब्द: तथा वामनश्च ७००वैक्रमाब्दरिति। काश्यां विरचनात् काशिकेति संज्ञा।

उदाहरणमण्ड़िता खलु काशिकावृत्तिः। [१] इष्ट्युपसंख्यानवत्त्वं शुद्धगणत्वं विवृतगूढ़सूत्रार्थत्वं व्युत्पन्नरूपसिद्धित्वञ्च काशिकात्वम्। [२] यद्यपि इष्टीनां कर्त्ता कात्यायनः प्रसिद्धः, तथापि काशिकाकारेणापि काश्चन इष्टयः प्रणीताः। प्राचीनवृत्तिग्रन्थेषु गणपाठाः भवन्ति, परन्तु काशिकायां विद्यमानाः गणपाठाः परिष्कृताः प्रामाणिकाश्च भवन्ति। विवृतगूढ़सूत्रार्थत्वं वृत्तिग्रन्थस्य वैशिष्ट्यं प्रतिपादयाति। [३] पाणिनीयसूत्राणि व्याकरणस्यात्मा चेत् शरीरमस्ति काशिका। [४] पाणिनीयव्याकरणस्य सर्वस्यापि कार्यंस्य सम्पन्नता काशिकायां परिलक्ष्यते। यथा शरीरेण सह आत्मा सुसम्पन्नः सुरक्षितश्च तथा काशिकया पाणिनीसूत्राणि समृद्धानि सुरक्षितानि च।

**काशिकावृत्तिगतोदाहरणवैशिष्ट्यम्**

काशिकावृत्तौ संगृहीतान्युदाहरणानि प्राचीनानि क्रमागतान्येवोपलभ्यन्ते। परम्परागतत्वात् काशिकोदाहरणैः परम्परायाः रक्षा जायते। अस्यां प्रतिसूत्रमनुवृत्तिः, वृत्तिः, उदाहरणानि, प्रत्युदाहरणानि च शङ्कासमाधाननिर्देशपुरःसरम् उपलभ्यन्ते। ऐतिहासिकसामग्रीदृष्ट्या सामाजिकतत्त्वदृष्ट्या भाषातात्त्विकदृष्ट्या च काशिकाख्योऽयं ग्रन्थोऽयमतीव मूल्यवानिति विदुषां मतम्। काशिकाकारः उदाहरणानां प्रयोगे जातिधर्मनिविशेषेण सर्वदा निरपेक्षतामाश्रयते। यत्रेतरसाम्प्रदायिकवैयाकरणाः खलूदाहरणानां प्रयोगे धर्मविश्वासभावनासु प्रचोदिताः सन्तः प्रतीयन्ते। सर्वदोषरहितं सर्वादृतं तत्त्वनिष्ठं मनोहरञ्च भवति काशिकोदाहरणम्। उदाहरणदृष्ट्या काशिकायाः महत्त्वपूर्णं स्थानमस्ति। तत्र काशिकोदाहरणानां वैशिष्ट्यद्वयं प्रतिपादयितुं शक्यते। काशिकायां परम्परागतानां प्रचीनोदाहरणानां बाहुल्यं वर्त्तते इति प्रथमम्। द्वितीयं वैशिष्ट्यं यद् काशिकावृत्तौ नवीनस्य विषयस्यापि सूचना प्राप्यते। महाभारतकालीनः द्रोणातिरिक्तः कश्चितदपरः अनादिः द्रोणः अस्तीति काशिकायां सूचना वर्त्तते। [५] प्रो. वेल्वकरमहोदयेन च वैशिष्ट्यमिदं काशिकायाः प्रशंसितं समर्थितञ्च। [६]

**इतरसाम्प्रदायिकव्याकरणोदाहरणैः साकं काशिकोदाहरणानां तात्पर्याकलनम्**

9वृत्तिसर्गतायनेषु क्रमः" [७] इति पाणिनीयसूत्रस्य व्याखानावसरे काशिकावृत्तौ 9ऋक्षस्य क्रमते बुद्धिः", 9यजुष्वस्य क्रमते बुद्धिः" इत्युदाहरणद्वयं प्राप्यते। अस्यैव सूत्रस्य व्याख्यानप्रसङ्गे अभयनन्दीमहावृत्तौ [८] 9क्रमते जैनेन्द्राध्ययनाय" इत्युदाहरणमवाप्यते। 9आङ् मर्यादावचने" [९] इति सूत्रस्य व्याख्यानदशायां प्रदत्तम् 9आकुमारं यशः पाणिनेः" इत्युदाहरणं भगवतः पाणिनेः गरिमां व्यनक्ति। परम् अभयनन्दीवृत्तौ [१०] 9आकुमारं यशः पाणिनेः" इत्युदाहरणस्य स्थाने 9आकुमारं यशः सुमन्तभद्रस्य" इत्युदाहरणं प्राप्यते। इत्थं 9उपोऽधिके च" [११] इत्यत्र काशिकाप्रदत्तोदाहरणं 9उपशाकटायनं व्याकरणम्" अस्ति। पुरुषोत्तमवृत्तौ च 9उपगोवर्धनं शाब्दिकाः" इत्युदाहरणं प्राप्यते। काशिकावृत्तिः शाकटायनव्याकरणस्य वैशिष्ट्यं व्यनक्ति, यत्र पुरुषोत्तमवृत्तिः प्राचीनं वैयाकरणं शाकटायनं विस्मृत्य अर्वाचीनस्य गोवर्धनस्य स्मरणं करोति। सिद्धान्तकौमुद्यां 9उपहरिं सुराः" इत्युदाहरणं प्राप्यते। यत्र प्राचीना महनीया च परम्परा विलुप्तप्राया अवलोक्यते।

**काशिकायां धर्मस्वरूपम्**

काशिकायां धर्मशब्दस्य स्वरूपद्वयं प्राप्यते। परम्परागतः नीतिगतश्चेति। परम्पराप्राप्तः आचारः धर्मः उच्यते। धर्म्ममित्याचारनियतं देयमुच्यते, धर्मो ह्यनुवृत्त आचारस्तस्मादनपेतं तेन वा प्राप्यमिति। [१२] आचारयुक्तः खलु धर्मः। शुल्कशालायाः धर्म्यं शौल्कशालिकम्। अत्र आचारयुक्तः शौल्कशालिकः भवति। [१३] धर्मशब्दस्यापरं स्वरूपं नीतिगतं स्यात्। धर्मं चरति धार्मिकः। [१४] धर्मस्य सततमाचरणमत्राभिप्रेतम्।

**वैदिकधर्मीरूपेण काशिकाकारः**

काशिकाकारः वैदिकधर्मी, जैनधर्मी अथवा बौद्धधर्मी इति विषये गवेषणा नैवार्वाचीना वर्त्तते। काशिकाकारः वैदिकधर्मी असीत् न वा इति प्रमाणयितुं 9यजुःष्वस्य क्रमते बुद्धिः" इत्युदाहरणमेव अधारत्वेन विद्वद्भिः ऐतिहासिकैश्च स्वीकृतं दृश्यते। अस्योदाहरणस्याधारेण काशिकाकारः यजुर्वेदी ब्राह्मणः आसीदिति निश्चेतुं शक्यते। किञ्च काशिकावृत्तौ वैदिकतत्त्वनिष्ठानामुदाहरणानां प्रावल्यमनुभूयते एव। तस्मादिदं सिद्धान्तयितयुं शक्यते यत् काशिकाकारस्य वैदिकवाङ्मये समधिकः प्रवेशः आसीदिति। परम् 9अनुदात्तं सर्वमपादादौ" [१५] इति सूत्रव्याख्यानावसरे श्लोकैकः प्राप्यते यत्, रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता। स एव नाथोऽस्माकं भगवान् शत्रुनन्दनः।। [१६]

एतादृशः श्लोकः समर्थयति यत् काशिकाकारः वैदिकधर्मी एव आसीत्। 9बहुलं छन्दसि" [१७] इति सूत्रस्य व्याख्यानप्रसङ्गे उदाहरणरूपेण विद्यमानमिदं 9मातृहा सप्तमं नरकं प्रविशेत्" [१८] इति श्रुतिवाक्यं वैदिकधर्मीरूपेण काशिकाकारं सिद्धान्तयति।

**वैदिकदेवता**

काशिकावृत्तौ सूत्राणां व्याख्यानवेलायामुदाहरणरूपेण वैदिकदेवतानां नामानि प्रमुखां भूमिकां निर्वाहयन्त्येव। वैदिकयज्ञकर्मणि मन्त्राणामैकश्रुत्यं [१९] भवतीति विषयमुदाहर्तुं काशिकाकारः मन्त्रमेकमुपस्थापयति यत्र वैदिकनामानि प्राप्यन्ते।

> अग्निमूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्।
> अपां रेतांसि जिन्वतो३म्।। [२०]
> किञ्च, सोमस्याग्ने व्रीहि३ वौ३षट्। [२१]

---

[1] काशिका, न्यासपदमजरीसहिता, भाग.१, पृ.४
व्युत्पन्नानां शब्दरूपाणां सिद्धिर्यस्यां सा व्युत्पन्नरूपसिद्धिः, उदाहरणमण्ड़ितेत्यर्थः ।

[2] काशिका, श्लोकसं.२
इष्ट्युपसंख्यानवती शुद्धगुणा विवृतगूढ़सूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ।।

[3] काशिका, भाग.२, पृ.५
गूढ़ग्रहणं सूत्रार्थमात्रोपलक्षणम् । सूत्रार्थप्रधाना इत्यर्थः । अनेन वृत्तिःलक्षणमुक्तम् ।

[4] काशिका, श्लोकसं. ३
व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत् ।
शिष्टः परिकरबन्धः क्रियतेऽस्य ग्रन्थकारेण ।।

[5] काशिका, पृ.३४६
नैवात्र महाभारतस्य द्रोणो गृह्यते । किन्तर्हि ? अनादिः

[6] Prof. S.K. Belvalkar, System of Sanskrit Grammar, p/37.
Sometimes KāŚikā gives us information which we cannot obtain from any source.

[7] काशिका.१.३.४८

[8] अभयनन्दी.२.२.३४

[9] काशिका.१.४.८९

[10] अभयनन्दी.१.३.१०

[11] काशिका.२.४.८७

[12] काशिका.६.२.६५

[13] काशिका.४.४.४७

[14] कअशिका.४.४.४१

[15] काशिका.८.१.१८

[16] काशिका, द्वितीयभागः, पृ.७९८

[17] काशिका.३.२.१८

[18] छान्दोग्योपनिषद्,७.१५२

[19] काशिका.१.१.३४

[20] ऋ.८.४४.१३

[21] ऐ.ब्रा.३.५.४.६

कासाञ्चन देवतानां द्वन्द्वः काशिकायामुदाहरनरूपेण प्राप्यते। देवताद्वन्द्वे च[२२] इति पाणिनीयसूत्रस्य व्याख्यानावसरे इन्द्राबृहस्पती इत्येतेषामुदाहरणानां प्रबन्धनं विद्यते। प्राचीनानां देवीनां नामानि काशिकोदाहरणरूपेण परिदृश्यन्ते। इन्द्राणी, वरुणानी, भवानी, शर्वाणी, मृड़ानी, अग्नायी, वृषाकपायी इत्यादीनि प्रसिद्धानि देवीनामानि।[२३] एतासु भवानी, शर्वाणी, मृड़ानी इत्येवं चत्वारि नामान्तराणि देव्याः अम्बिकायाः पार्वत्याः भवन्ति। अधुनिकाः देव्याः पार्वत्याः उपासकाः इति निर्विवादम्। काशिकाकालिकसमाजे कालवाचीशब्देष्वभिहिताः नूतनाः देवताः साधारणजनैरपि पूजिताः आसन्। 9कालेभ्यो भगवत् " [२४] इति पाणिनीयसूत्रमेव प्रमाणम्। सास्यदेवताप्रकरणे नैके कालवाचीनः देवतात्वेन पठिताः। ऋतुः देवतास्य ऋतव्यम् इत्युदाहरणम् ऋतुपूजनस्य धार्मिकीं प्रथां सूचयति। एवञ्च द्यवापृथिव्यम्, शुनासीर्यम्, मरूत्वत्यम्, अग्नीषोम्यम्, वास्तोष्पत्यम्, गृहमेध्यम् इत्येतान्युदाहरणानि वैदिकदेवतानां पूजनविषयकं तथ्यं प्रददाति।[२५]

**देवताशीर्वादः**

कारकाद्दत्तश्रुतयोरेवाशिषि[२६] इति पाणिनीयसूत्रस्य व्याख्यानावसरे काशिकाकारेण प्रदत्तं 9देवा एनं देयासुर्देवदत्तः", 9विष्णुरेनं श्रुयाद् विष्णुश्रुतः" इत्येवमुदाहरणद्वयं वैदिकदेवतानाम् आशीर्वादमूलकं नामकरणं भवति। नाम्नामन्ते विद्यमानौ देवशब्दः श्रुतशब्दश्च भवतः आशीर्वादसूचकौ। मनुष्याणां वैदिकदेवतां प्रति समधिका भक्तिः आसीदिति ज्ञायते। वरुणिकः, अर्यमिकः, शेवलेन्द्रदत्तः इत्येवं मनुष्यनामानि च वैदिकदेवतानाम् आशीर्वादमूलकानि भवन्ति। [२७] नारायणाशीर्वादमुलकं च 9वासुदेवकः" इति नाम तात्कालिकभक्तिभावनायाः परिचायकमस्ति।[२८] वासुदेवो भक्तिरस्य वासुदेवकः इति रूपं वासुदेवदेवताविशेषस्य परमेश्वरस्य संज्ञां द्योतयति।

**याज्ञकिसाहित्यम्**

9क्रतुयज्ञेभ्यश्च" [२९] इति पाणिनीयसूत्रस्य व्याख्यानावसरे वैदिकयज्ञस्य व्याखानपरकं साहित्यमुदाहरणरूपेण प्रस्तुतं काशिकाकारेण। अग्निष्टोमस्य व्याख्यानः, तत्र भवः -अग्निष्टोमकः। वाजपेयस्य व्याख्यानः, तत्र भवः - वाजपेयिकः। राजसूयस्य व्याख्यानः, तत्र भवः - राजसूयिकः। पाकयज्ञस्य व्याखानः, तत्र भवः - पाकयज्ञकिः। नवयज्ञस्य व्याख्यानः, तत्र भवः - नावयज्ञकिः। वासिर्षटिकः, वैश्वामैत्रकिः इत्येवमुदाहरणद्वयमपि वैदिकसाहित्यसूचम्। [३०] इत्थं काशिकाकारस्य समयः वैदिकधर्मस्योपरि पर्यवसितः।

**यजमानः**

वैदिकधार्मिकपरम्परायां यज्ञस्य महत्त्वपूर्णं स्थानम्। तत्रापि यजमानस्य भूमिका मूर्धाभिषिक्ता वर्त्तते। यावत् कालं यज्ञस्यावधिः तिष्ठति तावत् पर्यन्तं यज्ञस्य मुख्यः कर्त्ता यजमानः भवति।[३१] यज्ञस्य समाप्तेरनन्तरं यजमानः 9यज्वा" इति परिचितः भवति। [३२] विशिष्टस्य यज्ञस्याधारेण यजमानस्य विशेषणरूपेण अग्निष्टोमादीनां शब्दानां प्रयोगः प्राप्यते।[३३] यः पुरुषश्च स्वभावेन यजनशीलः भवति, तस्य कृते 9यायजूकः" इति शब्दः प्रयुज्यते। [३४] यज्ञानुष्ठानकाले वाग्संयमरूपं व्रतमाचरति।[३५] एवञ्च भूमौ शयनादिव्रतमपि यजमानः आचरति।[३६]

**सोमः**

वैदिकवाङ्मये सोमः देवतात्वेन विदतिम्। काशिकावृत्तौ सोमस्य अभिस्रवणकर्त्ता सुत्या, सोमसुत् इति नाम्ना अभिधीयते। [३७] सोमपानार्थं यः योग्यः भवति, सः 9सौम्यः" नाम्ना कथ्यते।[३८] सोमपानस्य अधिकारीविषये पतञ्जलिना प्रोक्तं यत्, 9एवं हि याज्ञकिाः पठन्ति दश पुरुषानूकं यस्य गृहे शुद्रा न विद्येरन् स सोमं पिबेदिति"।[३९] काशिकाकारः 9वर्षस्याभविष्यति"[४०] इति सूत्रस्य व्याख्यानावसरे मनुस्मृतेः वचनं सिद्धान्तयति। तद्यथा- यस्य त्रैवर्षिकं धान्यं निहितं भृत्यवृत्तये। अधिकं वापि विद्यते स सोमं पातुमर्हति।।[४१] किञ्च, 9सर्वे सुन्वन्तः सर्वे यजमानाः सत्रिण उच्यन्ते" इति काशिकाकारः 9सुञो यज्ञसंयोगे" इति सूत्रस्य व्याख्यानदशायां सूचयति।[४२]

**यज्ञकुण्ड़म्**

वैदिकयज्ञकुण्ड़स्य निर्माणविषये काशिकोदाहरणेषु सम्यक् सूचना प्राप्यते। 9कर्मण्यग्न्याख्यायाम्" [४३] इति सूत्रस्य व्याख्यानावसरे प्राप्तं 9श्वेनचित्", 9अग्निचित्" इत्युदाहरणद्वयं यज्ञकुण्ड़स्य आकृतिविषयकं ज्ञानं प्रददाति। श्वेन इव चीयते, श्वेनचित्। कङ्क इव चीयते, कङ्कचित्। सूत्रे 9अग्न्याख्यायाम्" इति पदं यज्ञे इष्टिकानां चयनरूपमर्थं द्योतयति। काशिकाकारः 9अश्विमानण्" इति सूत्रस्य व्याख्यानदशायां कथयति यत्, 9आस्विमानुपधानो यन्त्र आसामिष्टकानामिति विगृह्याणि विधीयते"।[४४] अत्र 9आश्विनी" इति यज्ञेष्टिकायाः नाम प्राप्यते।

**व्रतः**

काशिकाकालिकं धार्मिकजीवनं व्रतस्योपरि पर्यवसितमासीत्। प्रामुख्येण व्रतस्य त्रैविध्यं काशिकावृत्तिगतोदाहरणेषु प्रतिफलितं वर्त्तते। पारायणः, तौरायणिकः, चान्द्रायणश्चेति। [४५] वेदस्य सम्पूणम् अध्ययनं पारायणव्रते क्रियते। आदितः आरभ्यान्तादविच्छेदेन वेदाध्ययनं पारायणम् उच्यते। एकवर्षं यावत् हविर्यज्ञविधानं तौरायणिकव्रते भवति। तत्र गुरुशिष्ययोः कृते पारयणव्रतः, यजमानजीवनस्य कृते तौरायणिकः, तपस्वीजीवनस्य कृते च चान्द्रायणव्रतः प्रसिद्धः आसीत्। चान्द्रायणव्रतः तपोविशेषः भोजननिवृत्तिपरकश्चासीत्। व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते। काशिकायामपि दिक्षातपसी, श्रद्धातपसी, मेधातपसी, अध्ययनतपसी, श्रद्धामेधे इत्येवमुदाहरणानि संगृहीतानि दृश्यन्ते। [४६] एतानि उदाहरणानि अथर्ववेदतत्त्वोपेतानि। [४७] इत्थं काशिकोदाहरणेषु वैदिकधर्मस्य शाश्वतस्वरूपं प्रतिपादितं वर्त्तते।

---

22 काशिका.६.२.१४१

23 काशिका.४.१.३७

तत्रैव ४.१.४९

24 काशिका.४.२.३४

25 काशिका.४.२.३२

26 काशिका.६.२.१४८

27काशिका.५.३.८४

28 काशिका.४.३.९८

29 काशिका.४.३.३८

30 काशिका.४.३.३९

31 काशिका.३.२.१२८

32 काशिका.३.२.१०३

33 काशिका.३.२.८५

34 काशिका.३.२१६६ इज्याशीलो यायजूकः

35 वाचि यमो व्रते,३.२.४०

36 स्थंड़िलाच्छयितरि व्रते या स्थंडिलशायी, ३.२.८०

37 काशिका.३.२.९९,३.२.९०

38 काशिका. सोममर्हति यः,४.४.१३७

39 भाष्य.४.१९३

40 काशिका.७.३.१६

41 मनु.११.७

42 काशिका.३.२.१३२

43 काशिका.३.२.९२

44 काशिका.४.४.१२६

45 काशिका.५.१.७२

46 काशिका.२.४.१४

47 सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति- अथर्व.१२.१.१

**धार्मिककर्मार्हता**

धार्मिककार्यं निर्वाहयितुम् समाजे ब्राह्मणव्यक्तिविशेषस्य कृते अर्हताव्यवस्था आसीत्। तत्र यः ब्राह्मणः यज्ञकर्म निर्वाहयितुम् अर्हति सः यज्ञियः ब्राह्मणः इत्युच्यते। यश्च ऋत्विक्कर्म सम्पादयितुमर्हति सः आर्त्विजीनः ब्राह्मणः इत्युच्यते।[४८] दक्षिणामर्हति यः ब्राह्मणः सः दक्षिण्यः इति नाम्ना कथ्यते।[४९]

**उपसंहारः**

काशिकावृत्तौ पाणिनीयसूत्राणां व्याख्यानावसरे यान्युदाहरणपदानि प्राप्यन्ते तेषां प्रयोजनत्वं न केवलं व्याकरणलक्षणपूर्त्त्ये तिष्ठति। काशिकोदाहरणानामैतिहासिकमध्ययनमाधुनिकगवेषणाक्षेत्रे नूतनां दिशां जनयति। यद्यपि काशिकाकारः धर्मनिरपेक्षतायाः परिचयं ददाति तथापि वैदिकवाङ्मये एतस्य वैयाकरणस्य समधिकः प्रवेशः आसीदिति ज्ञायते। काशिकावृतौ पठितानामुदाहरणानाम् ऐतिहासिकाध्ययने तत्त्वावबोधये च नूनमेव शोधपत्रमिदं प्राथमिकत्वं भजते।

**सन्दर्भग्रन्थसूची**


1. वेदालङ्कारः, रघुवीर (व्याक्याकार;) श्रीमद्वामन-जयादित्यविरचिता पाणिनीयाष्टाध्यायीसूत्रवृत्तिः काशिका(प्रथमभागः), दिल्ली, २०१०
2. वेदालङ्कारः, रघुवीर (व्याक्याकार;) श्रीमद्वामन-जयादित्यविरचिता पाणिनीयाष्टाध्यायीसूत्रवृत्तिः काशिका(द्वितीयभागः), दिल्ली, २०१०
3. त्रिपाठी, जयशङ्कर लाल,सुधाकर मालवीय(संपादकः), वामनजयादित्यविरचिता काशिका न्यास-पदमञ्जरी-भावबोधिनी-सहेता (प्रथमभागतः दशमभागपर्यन्तम्), तारा बुक एजेन्सी, वाराणसी, १९८५
4. दाशः, राधामाधव, ईडियम्स् इन् काशिका, प्रतिभा प्रकाशन, शक्तिनगर, दिल्ली, १९९५


---

[48] काशिका.५.१.७१

[49] काशिका.५.१.६९